# shrIbagalApanjarastotram

# શ્રીબગલાપઞ્જરસ્તોત્રમ્ અથવા શ્રીપીતામ્બરાપઞ્જરસ્તોત્રમ્

## Document Information

Text title : bagalApanjarastotram

File name : bagalApanjarastotram.itx

Category : devii, dashamahAvidyA, panjara, devI, kavacha

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD, PSA Easwaran

Latest update : July 30, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીબગલાપઞ્જરસ્તોત્રમ્ અથવા શ્રીપીતામ્બરાપઞ્જરસ્તોત્રમ્

સૂત ઉવાચ -
સહસ્રાદિત્યસઙ્કાશં શિવં સામ્બં સનાતનમ્ ।
પ્રણમ્ય નારદઃ પ્રાહ વિનમ્રો નતકન્ધરઃ ॥ ૧॥

શ્રીનારદ ઉવાચ -
ભગવન્ સામ્બ તત્ત્વજ્ઞ સર્વદુઃખાપહારક ।
શ્રીમત્પીતામ્બરાદેવ્યાઃ પઞ્જરં પુણ્યદં સતામ્ ॥ ૨॥

પ્રકાશય વિભો નાથ કૃપાં કૃત્વા મમોપરિ ।
યદ્યહં તવ પાદાબ્જધૂલિધૂસરિતોઽભવત્ ॥ ૩॥

વિનિયોગઃ -
અસ્ય શ્રીમદ્બગલામુખી પીતામ્બરા પઞ્જરરૂપસ્તોત્રમન્ત્રસ્ય
ભગવાન્ નારદઋષિઃ, અનુષ્ટુપ્છન્દઃ,
જગદ્વશ્યકરી શ્રીપીતામ્બરા બગલામુખી દેવતા,
હ્લીં બીજં, સ્વાહા શક્તિઃ, ક્લીં કીલકં,
મમ વિપક્ષપરસૈન્યમન્ત્ર-તન્ત્ર-યન્ત્રાદિકૃત્યક્ષયાર્થં
શ્રીમત્પીતામ્બરા બગલામુખી દેવતાપ્રીત્યર્થે ચ જપે વિનિયોગઃ ॥

ઋષ્યાદિ ન્યાસઃ -
ભગવાન્ નારદઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
જગદ્વશ્યકરી શ્રીપીતામ્બરા બગલામુખી દેવતાયૈ નમઃ હૃદયે ।
હ્લીં બીજાય નમઃ દક્ષિણસ્તને સ્વાહા । શક્ત્યૈ નમઃ વામસ્તને ।
ક્લીં કીલકાય નમઃ નાભૌ ।
મમ વિપક્ષપરસૈન્યમન્ત્રતન્ત્રયન્ત્રાદિકૃત્યક્ષયાર્થં
શ્રીમત્પીતામ્બરા બગલાદેવ્યાઃ પ્રીતયે જપે વિનિયોગઃ ।
કરસમ્પુટેન કરમૂલેન કરશુદ્ધિઃ ।

હ્લામિતિ ષટ્દીર્ઘેણ ષડઙ્ગઃ । મૂલેન વ્યાપકન્યાસં કુર્યાત્ ॥

કરન્યાસઃ -
હ્લાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
હ્લીં તર્જનીભ્યાં સ્વાહા ।
હ્લૂં મધ્યમાભ્યાં વષટ્ ।
હ્લૈં અનામિકાભ્યાં હુમ્ ।
હ્લૌં કનિષ્ઠિકાભ્યાં વૌષટ્ ।
હ્લઃ કરતલકરપૃષ્ઠાભ્યાં ફટ્ ॥

અઙ્ગન્યાસઃ -
હ્લાં હૃદયાય નમઃ ।
હ્લીં શિરસે સ્વાહા ।
હ્લૂં શિખાયૈ વષટ્ ।
હ્લૈં કવચાય હુમ્ ।
હ્લૌ નેત્રત્રયાય વૌષટ્ ।
હ્લઃ અસ્ત્રાય ફટ્ ॥

વ્યાપકન્યાસઃ -
ૐ હ્લીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ બગલામુખી તર્જનીભ્યાં સ્વાહા ।
ૐ સર્વદુષ્ટાનાં મધ્યમાભ્યાં વષટ્ ।
ૐ વાચં મુખં પદં સ્તમ્ભય અનામિકાભ્યાં હુમ્ ।
ૐ જિહ્વાં કીલય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
ૐ બુધ્દિં વિનાશય હ્લીં ૐ સ્વાહા કરતલકરપૃષ્ઠાભ્યાં ફટ્ ॥

અઙ્ગન્યાસઃ -
ૐ હ્લીં હૃદયાય નમઃ ।
ૐ બગલામુખિ શિરસે સ્વાહા ।
ૐ સર્વદુષ્ટાનાં શિખાયૈ વષટ્ ।
ૐ વાચં મુખં પદં સ્તમ્ભય કવચાય હુમ્ ।
ૐ જિહ્વાં કીલય નેત્રત્રયાય વૌષટ્ ।
ૐ બુધ્દિં વિનાશય હ્લીં ૐ સ્વાહા, અસ્ત્રાય ફટ્ ॥

ધ્યાનમ્ -

મધ્યે સુધાબ્ધિમણિમણ્ડપરત્નવેદ્યાં var મણિમણ્ડિતરત્નવેદ્યાં
સિંહાસનોપરિગતાં પરિપીતવર્ણામ્ ।
પીતામ્બરાભરણમાલ્યવિભૂષિતાઙ્ગીં
દેવીં સ્મરામિ ધૃતમુદ્ગરવૈરિજિહ્વામ્ ॥ var નમામિ

ઇતિ ધ્યાત્વા મનસા સમ્પૂજ્ય, યોનિમુદ્રાં એવં મુદ્ગરમુદ્રાં પ્રદર્શ્ય,
ઋષ્યાદિન્યાસં કૃત્વા, પઞ્જરં ન્યસ્યેત્ ।

શ્રીપીતામ્બરાયૈ નમઃ લં પૃથિવ્યાત્મકં ગન્ધં પરિકલ્પયામિ ।
શ્રીપીતામ્બરાયૈ નમઃ હં આકાશાત્મકં પુષ્પં પરિકલ્પયામિ ।
શ્રીપીતામ્બરાયૈ નમઃ યં વાયવ્યાત્મકં ધૂપં પરિકલ્પયામિ ।
શ્રીપીતામ્બરાયૈ નમઃ વં અમૃતાત્મકં નૈવેદ્યં પરિકલ્પયામિ ॥

અથ પઞ્જરસ્તોત્રમ્ ।

શ્રીશિવ ઉવાચ -

પઞ્જરં તત્પ્રવક્ષ્યામિ દેવ્યાઃ પાપપ્રણાશનમ્ ।
યં પ્રવિશ્ય ચ બાધન્તે બાણૈરપિ નરાઃ ક્વચિત્ ॥ ૧॥

ૐ ઐં હ્લીં શ્રીં શ્રીમત્પીતામ્બરાદેવી બગલા બુદ્ધિવર્દ્ધિની ।
પાતુ મામનિશં સાક્ષાત્ સહસ્રાર્કસમદ્યુતિઃ ॥ ૨॥

ૐ ઐં હ્લીં શ્રીં શિખાદિપાદપર્યન્તં વજ્રપઞ્જરધારિણી ।
બ્રહ્માસ્ત્રસંજ્ઞા યા દેવી પીતામ્બરાવિભૂષિતા ॥ ૩॥

ૐ ઐં હ્લીં શ્રીં શ્રીબગલા હ્યવત્વત્ર ચોર્ધ્વભાગં મહેશ્વરી ।
કામાઙ્કુશા કલા પાતુ બગલા શાસ્ત્રબોધિની ॥ ૪॥

ૐ ઐં હ્લીં શ્રીં પીતામ્બરા સહસ્રાક્ષા લલાટં કામિતાર્થદા ।
પાતુ માં બગલા નિત્યં પીતામ્બરસુધારિણી ॥ ૫॥

ૐ ઐં હ્લીં શ્રીં કર્ણયોશ્ચૈવ યુગપદાતિરત્નપ્રપૂજિતા ।
પાતુ માં બગલાદેવી નાસિકાં મે ગુણાકરા ॥ ૬॥

ૐ ઐં હ્લીં શ્રીં પીતપુષ્પૈઃ પીતવસ્ત્રૈઃ પૂજિતા વેદદાયિની ।
પાતુ માં બગલા નિત્યં બ્રહ્મવિષ્ણ્વાદિસેવિતા ॥ ૭॥

ૐ ઐં હ્લીં શ્રીં પીતામ્બરા પ્રસન્નાસ્યા નેત્રયોર્યુગપદ્ભ્રુવૌ ।
પાતુ માં બગલા નિત્યં બલદા પીતવસ્ત્રધૃક્ ॥ ૮॥ var બલિદા

ૐ ઐં હ્લીં શ્રીં અધરોષ્ઠૌ તથા દન્તાન્ જિહ્વાં ચ મુખગાં મમ ।
પાતુ માં બગલાદેવી પીતામ્બરસુધારિણી ॥ ૯॥

ૐ ઐં હ્લીં શ્રીં ગલે હસ્તે તથા બાહ્વોઃ યુગપદ્બુદ્ધિદાસતામ્ ।
પાતુ માં બગલાદેવી દિવ્યસ્રગનુલેપના ॥ ૧૦॥

ૐ ઐં હ્લીં શ્રીં હૃદયે ચ સ્તને નાભૌ કરાવપિ કૃશોદરી ।
પાતુ માં બગલા નિત્યં પીતવસ્ત્રઘનાવૃતા ॥ ૧૧॥

જઙ્ઘાયાં ચ તથા ચોર્વોર્ગુલ્ફયોશ્ચાતિવેગિની ।
અનુક્તમપિ યત્સ્થાનં ત્વક્કેશનખલોમકમ્ ॥ ૧૨॥

અસૃઙ્માંસં તથાસ્થીની સન્ધયશ્ચાપિ મે પરા ।
તાઃ સર્વા બગલાદેવી રક્ષેન્મે ચ મનોહરા ॥ ૧૩॥

ફલશ્રુતિઃ ।

ઇત્યેતદ્વરદં ગોપ્યં કલાવપિ વિશેષતઃ ।
પઞ્જરં બગલાદેવ્યાઃ ઘોરદારિદ્ર્યનાશનમ્ ।
પઞ્જરં યઃ પઠેદ્ભક્ત્યા સ વિઘ્નૈર્નાભિભૂતયે ॥ ૧૪॥

અવ્યાહતગતિશ્ચાસ્ય બ્રહ્મવિષ્ણ્વાદિસત્પુરે ।
સ્વર્ગે મર્ત્યે ચ પાતાલે નારયસ્તં કદાચન ॥ ૧૫॥

ન બાધન્તે નરવ્યાઘ્રં પઞ્જરસ્થં કદાચન ।
અતો ભક્તૈઃ કૌલિકૈશ્ચ સ્વરક્ષાર્થં સદૈવ હિ ॥ ૧૬॥

પઠનીયં પ્રયત્નેન સર્વાનર્થવિનાશનમ્ ।
મહાદારિદ્ર્યશમનં સર્વમાઙ્ગલ્યવર્ધનમ્ ॥ ૧૭॥

વિદ્યાવિનયસત્સૌખ્યં મહાસિદ્ધિકરં પરમ્ ।
ઇદં બ્રહ્માસ્ત્રવિદ્યાયાઃ પઞ્જરં સાધુ ગોપિતમ્ ॥ ૧૮॥

પઠેત્સ્મરેદ્ધ્યાનસંસ્થઃ સ જયેન્મરણં નરઃ ।
યઃ પઞ્જરં પ્રવિશ્યૈવ મન્ત્રં જપતિ વૈ ભુવિ ॥ ૧૯॥

કૌલિકોઽકૌલિકો વાપિ વ્યાસવદ્વિચરેદ્ભુવિ ।
ચન્દ્રસૂર્યસમો ભૂત્વા વસેત્કલ્પાયુતં દિવિ ॥ ૨૦॥

શ્રીસૂત ઉવાચ

ઇતિ કથિતમશેષં શ્રેયસામાદિબીજમ્ ।
ભવશતદુરિતઘ્નં ધ્વસ્તમોહાન્ધકારમ્ ।
સ્મરણમતિશયેન પ્રાપ્તિરેવાત્ર મર્ત્યૈઃ ।
યદિ વિશતિ સદા વૈ પઞ્જરં પણ્ડિતઃ સ્યાત્ ॥ ૨૧॥

॥ ઇતિ પરમરહસ્યાતિરહસ્યે શ્રીપીતામ્બરાપઞ્જરસ્તોત્રં સમ્પૂર્ણમ્ ॥

વજ્રપઞ્જરકવચસ્તોત્રમ્

Encoded by DPD
Proofread by DPD, PSA Easwaran

*shrIbagalApanjarastotram*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*